दुर्भिक्षं जायते सर्व्वा मेदिनी दुष्यति प्रिये।
द्रवे प्रयान्ति तोयानि मानवा दुःखिता भुवि॥३५
सुवर्णरूप्यधान्यानि जगत् सर्व्वं सुशोभनम्।
ब्राह्मणा वणिजस्तुष्टाः सुभिक्षे शुभकृत् प्रिये॥३६
सुभिक्षं क्षेममारोग्यं हृष्टा गोब्राह्मणाः प्रिये।
सुखिताः शोभने वर्षे प्रजाः सर्व्वाः सुलोचने॥३७
त्रिषमस्थं जगत् सर्व्वं व्याकुलं समुदाहृतम्।
जनानां जायते भद्रे क्रोधे क्रोधः परस्परम्॥३८
सर्व्वत्र जायते क्षेमं सर्व्वशस्यमहार्घता।
विश्वावसौ वरारोहे कार्पासस्य महार्घता॥३९॥
पार्थिवैर्नृपसैन्यैश्च समस्तैः खण्डमण्डले।
प्रपीड्यन्ते जनाः सर्व्वे भयभीताः पराभवे॥४०॥
तृणधान्यानि पीड्यन्ते ग्रीष्मे वर्षति वासवः।
प्लवङ्गे पीडिताः सर्व्वाः प्रजाश्च सुरवन्दिते॥४१॥
जायन्ते सर्व्वशस्यानि सुभिक्षं निरुपद्रवम्।
सौम्यदृष्टिर्भवेद्राजा कालिके च शुभं वदेत्॥४२
सुभिक्षं क्षेममारोग्यं सुखञ्च निरुपद्रवम्।
सौम्यदृष्टिर्भवेद्राजा सौम्ये सौख्यं प्रकीर्त्तितम्॥४३
तोयपूर्णो भवेन्मेघो वर्त्तते च दिने दिने।
निरुपद्रवाश्च राजानः सर्व्वसाधारणे प्रिये॥४४
वासवी वर्षति देवि देशे चाखण्डमण्डले।
अहिच्छत्रे कान्यकुब्जे विरोधि क्षत्रियाशकृत्॥४५
अभिभूतं जगत् सर्व्वं क्लेशैर्बहुविधैः प्रिये।
मारुतैः फलदाहैश्च परिधाविनि शोभने॥४६॥
निष्पत्तिः सर्व्वशस्यानां सुभिक्षं भवति प्रिये।
प्रमाथिनि जलोद्गारी जलदो मोदते प्रजा॥४७।
निष्पत्तिः सर्व्वशस्यानां सर्व्वशस्यमहार्घता।
घृतं तैलसमं याति आनन्दे नन्दति प्रजा॥४८॥
कोद्रवाः शालिमुद्गाश्च पीड्यन्ते वरवर्णिनि।
सर्व्वौषधानि धान्यानि राक्षसे निष्ठुराः
प्रजाः॥४९॥
दुर्भिक्षं जायते घोरं धान्यौषधिप्रपीडनम्।
अनले च समाख्यातं नात्र कार्य्या विचारणा॥५०
देशभङ्गः सुदुर्भिक्षं समासात् कथयाम्यहम्।
पिङ्गले चारुपद्माक्षि दुर्भिक्षं नर्म्मदातटे॥५१॥
गोमहिष्यो विनश्यन्ति ये चान्ये नटनर्त्तकाः।
वासवो वर्षति देवि शस्यञ्च नहि जायते॥
तिलसर्षपमाषादिकार्पासानां महार्घता।
गोमहिष्यः सुवर्णानि कांस्यताम्राद्यशेषतः॥
तत्सर्व्वं देवि विक्रीय कर्त्तव्यो धान्यसञ्चयः।
तेन धान्येन लोकोऽयं निस्तरिष्यति दुर्द्दिनम्।
पार्थिवा मोषकादीनाः कालयुक्ते प्रपीडिताः॥५२
तोयपूर्णाः स्मृता मेघा बहुशस्या च मेदिनी।
निष्ठुराः पार्थिवा देवि सिद्धार्थे च वरानने॥५३
अल्पतोया घनाश्चैव कीटकाः प्रबलाः स्मृताः।
विरुद्धाः पार्थिवा देवि रौद्रे संवत्सरे प्रिये॥५४
दुर्भिक्षं मध्यमं प्रोक्तं व्यवहारो न वर्त्तते।
भवेद्दै मध्यमा वृष्टिर्दुर्म्मतौ समुपस्थिते॥५५॥
दुर्भिक्षं जायते लोकाः सर्व्वे द्रविणवर्ज्जिताः।
प्राणिनां जायतेऽहर्षो दुन्दुभौ वरवर्णिनि॥५६॥
महिषीगोहिरण्यादिताम्रकांस्याद्यशेषतः।
तत् सर्व्वं देवि विक्रीय कर्त्तव्यो धान्यसञ्चयः॥

रक्ते संवत्सरे देवि क्रूरबुद्धिर्नराधिपः।
मानवाः क्रूरचेष्टाश्च संग्रामे रुधिरं भवेत्॥५७॥
दुर्भिक्षं मरणं घोरं धान्यौषधिप्रपीडनम्।
पापरोगो भवेद्देवि रक्ताख्ये ऽमरवन्दिनि॥५८॥
रोगो मरणदुर्भिक्षं विरोधो बहुसङ्कुलम्।
क्रोधे तु विषमं सर्व्वं समाख्यातं हरप्रिये॥५९
मेदिनी लभते देवि सर्व्वभूतं चराचरम्।
देशभङ्गश्च दुर्भिक्षं क्षये संक्षीयते प्रजा॥
सौराष्ट्रे मालवे देशे दक्षिणे कोङ्कणे तथा।
दुर्भिक्षं जायते घोरं क्षये संवत्सरे प्रिये॥
कौमुदीनर्म्मदाद्याश्च यमुनानर्म्मदातटम्।
विन्ध्यायां सैन्धवश्चापि विनश्यति न संशयः॥
सिंहलं मध्यदेशञ्च कालञ्जरं तथैव च।
क्षये क्षयन्ति सर्व्वाणि नान्यथा वरवर्णिनि॥"६०
इति ज्योतिस्तत्त्वम्॥

षष्टिहायनः, पुं, (षष्टिर्हायना आयुःकालो यस्य।) गजः। धान्यविशेषः। इति मेदिनी राजनिर्घण्टश्च॥ षष्टिसंख्यकवत्सरः। तत्संख्यवयोयुते, त्रि, ॥ (यथा, महाभारते।१।१५४।४४।
"बभञ्जतुस्तदा वृक्षाँल्लताश्चाकर्षतुस्तदा।
मत्ताविव च संरब्धौ वारणौ षष्टिहायनौ॥")

षष्ठः, त्रि, (षष्+तस्य पूरणे डट्।५।२।४८। डट्। षट्कतिकतिपयचतुरां थुक्।५।२।५१। इति थुक्।) षण्णां पूरणः। इति मेदिनी॥ (यथा, रघुः।१७।७८।
"पञ्चमं लोकपालानामूचुः साधर्म्म्ययोगतः।
भूतानां महतां षष्ठमष्टमं कुलभूभृताम्॥")

षष्ठकः, त्रि, षष्ठः। षष्ठशब्दात् स्वार्थे कन्प्रत्ययेन निष्पन्नः॥ (षष्ठो भागः। "मानपश्वङ्गयोः कन्लुकौ च।" ५।३।५१। इति कन्। "षष्ठको भागो मानञ्चेद्भवति।" इति काशिका॥)

षष्ठान्नकालकं, क्ली, द्विरहानन्तरभुक्तम्। यथा
"द्व्यन्तरे त्र्यन्तरे भुक्तमाहुः षष्ठान्नकालकम्।"
इति त्रिकाण्डशेषः॥

षष्ठिका, स्त्री, (षष्ठी+स्वार्थे कन्।) यथा। चामुण्डत्यत्र षष्ठिकेत्यूह्यम्। इति दुर्गोत्सवीयबलिदानप्रकरणे तिथ्यादितत्त्वम्॥

षष्ठी, स्त्री, (षष्ठ+ङीप्।) कात्यायनी। इति मेदिनी॥ षोड़शमातृकान्तर्गतमातृकाविशेषः। सा प्रकृतेः षष्ठीकला स्कन्दभार्य्या च। तस्याः स्वरूपादिर्यथा,—
"प्रधानांशस्वरूपा या देवसेना च नारद!।
मातृकासु पूज्यतमा सा च षष्ठी प्रकीर्त्तिता॥
शिशूनां प्रतिविश्वेषु प्रतिपालनकारिणी।
तपस्विनी विष्णुभक्ता कार्त्तिकेयस्य कामिनी॥
षष्ठांशरूपा प्रकृतेस्तेन षष्ठी प्रकीर्त्तिता।
पुत्त्रपौत्त्रप्रदात्री च धात्री त्रिजगतां सती॥
सुन्दरी युवती रम्या सततं भर्त्तुरन्तिके।
स्थाने शिशूनां परमा वृद्धरूपा च योगिनी॥
पूजा द्वादशमासेषु यस्या विश्वेषु सन्ततम्।
पूजा च सूतिकागारे परा षष्ठदिने शिशोः॥
एकविंशतिमे चैव पूजा कल्याणहेतुकी।
शश्वन्नियमिता चैषा नित्या काम्याहुतिः परा॥
मातृरूपा दयारूपा शश्वद्रक्षणरूपिणी।
जले स्थले चान्तरीक्षे शिशूनां स्वप्नगोचरे॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १ अध्यायः॥*॥
अपि च।

श्रीनारायण उवाच।
"षष्ठांशा प्रकृतेर्या च सा तु षष्ठी प्रकीर्त्तिता।
तस्याः पूजाविधौ ब्रह्मन् इतिहासमिमं शृणु॥
राजा प्रियव्रतस्त्वासीत् स्वायम्भुवमनोः सुतः।
योगीन्द्रो न वहेद्भार्य्यां तपस्यासु रतः सदा॥
ब्रह्माज्ञया च यत्नेन कृतदारो बभूव सः।
सुचिरं कृतदारश्च न लेभे तनयं ततः॥
पुत्त्रेष्टियज्ञं तञ्चापि कारयामास कश्यपः।
मालिन्यै तस्य कान्तायै मुनिर्यज्ञचरुं ददौ॥
भुक्त्वा चरुञ्च तस्याश्च सद्यो गर्भो बभूव ह।
दधार तञ्च सा देवी दैवं द्वादशवत्सरम्॥
ततः सुषाव सा ब्रह्मन् कुमारं कनकप्रभम्।
सर्व्वावयवसम्पन्नं मृतमुत्तानलोचनम्॥
श्मशानञ्च ययौ राजा गृहीत्वा बालकं मुने।
एतस्मिन्नन्तरे तत्र विमानञ्च ददर्श ह॥
ददर्श तत्र देवीञ्च कमनीयां मनोहराम्।
दृष्ट्वा तां पुरतो राजा तुष्टाव परमादरम्॥
पप्रच्छ राजा तां दृष्ट्वा ग्रीष्मसूर्य्यसमप्रभाम्।
तेजसा ज्वलितां कान्तां शान्तां स्कन्दस्य नारद॥

प्रियव्रत उवाच।
का त्वं सुशोभने कस्य कान्ते कान्तासि सुव्रते।
कस्य कन्या वरारोहा धन्या मान्या च योषिताम्॥

देवसेनोवाच।
ब्रह्मणो मानसी कन्या देवसेनाहमीश्वरी।
दृष्ट्वा मां मनसा धाता ददौ स्कन्दाय भूमिप॥
मातृकासु च विख्याता स्कन्दभार्य्या च सुव्रता
विश्वे षष्ठीति विख्याता षष्ठांशा प्रकृतेर्यतः॥
इत्येवमुक्त्वा सा देवी गृहीत्वा बालकं मुने।
महाज्ञानेन तपसा जीवयामास लीलया॥
गृहीत्वा बालकं देवी गगनं गन्तुमुद्यता।
पुनस्तुष्टाव तां राजा शुष्ककण्ठौष्ठतालुकः॥
नृपस्तोत्रेण सा देवी परितुष्टा बभूव ह।
उवाच तं नृपं ब्रह्मन्! वेदोक्तं कर्म्मनिर्म्मितम्॥

देवसेनोवाच।
त्रिषु लोकेषु राजा त्वं स्वायम्भुवमनोः सुतः।
मम पूजाञ्च सर्व्वत्र कारयित्वा स्वयं कुरु॥
तदा दास्यामि पुत्त्रन्ते कुलपद्मसनोहरम्।
इत्येवमुक्त्वा सा देवी तस्मै तद्बालकं ददौ॥
राजा चकार स्वीकारं तत्पूजार्थञ्च सुव्रतः।
जगाम देवी स्वर्गञ्च दत्त्वा तस्मै शुभं वरम्॥
आजगाम महाराजः स्वगृहं हृष्टमानसः।
देवीं तां पूजयामास ब्राह्मणेभ्यो धनं ददौ॥
राजा च प्रतिमासेषु शुक्लषष्ठ्यां महोत्सवम्।
षष्ठ्या देव्याश्च यत्नेन कारयामास सर्व्वतः॥
बालानां सूतिकागारे षष्ठाहे यत्नपूर्व्वकम्।
तत्पूजां कारयामास चैकविंशतिवासरे॥